# "सारस्वतोल्लासकाव्य" विशे

- सं. विजयशीलचन्द्रसूरि

मात्र १५३ पद्य-प्रमाण आ लघुकाव्य, मध्यकालीन संस्कृत काव्य-साहित्यमां एक अनोखी भात पाडे तेवुं मजानुं काव्य छे. आना कर्ताए पोतानुं नाम अज्ञात राख्युं छे, अने पोताना गुरुनुं नाम (पद्य १५३) निर्देश्युं छे. पोताना गच्छ के गुरुपरंपरानो पण तेमणे क्यांय उल्लेख कर्यो नथी. आ काव्यनी मने मळेली एक मात्र प्रतिना आधारे आ संपादन थयुं छे, अने तेथी आमां केटलीक शुद्धिओ थवी आवश्यक लागे छे, जे बीजी प्रति मळे तो ज संभवित थाय. पांच पत्रोनी आ प्रति, अनुमानतः १६मा शतकमां लखायेली जणाय छे.

**काव्यनो विषय :** श्रीनन्दिरत्न नामना साधुवरना अनामी शिष्य-साधुवर्ये, पोतानी जडताने दूर करवा माटे करेली सारस्वत-साधनानुं हृद्य अने रम्यमय वर्णन-ए आ काव्यनो विषय छे. कर्ता पोते ज काव्यना जाणे के नायक छे, अने ते पोताना अनुभवनुं बयान आपतां आपतां केटलांक मस्त वर्णन पण आपे छे; आ ज आ काव्यनी खूबी पण छे.

कर्ता पोताने 'कश्चित् जनः' तरीके (पद्य १) निर्देशे छे अने पछी ज्यारे ज्यारे पोताने रजू करवानो प्रसंग आव्यो त्यारे त्यारे 'सः' पदथी पोताने ओळखावे छे. प्रथम पद्यमां ज कर्ता जणावे छे के–"पोतानी जडताथी लज्जित हैये, एक मनुष्य, श्रीगुरुनी शुश्रूषा करवापूर्वक, सारभूत एवा सारस्वत मंत्रने प्राप्त करीने, रात-दिन तेना जापमां मची पड्यो हतो."

आ पछीनां नवेक पद्योमां जापविषयक स्थिति-पद्धतिनुं मोधम वर्णन छे, जेमां पद्मासने बेसवानी, शौच करवानी, श्वेत वस्त्र-परिधाननी, स्फटिकनी माला वडे जापनी नोंध मळे छे. जापनो पंदरमो दिन दीपावली दिन (११) होवानुं जणावीने, पोतानो आ जाप संभवतः १५ दिननो होवानुं कर्ताए आडकतरुं सूचन आप्युं छे. ए पछीनां पद्योमां दीपोत्सवी पर्वनुं अने तेमां थता लोकोना व्यवहारोनुं अत्यंत रोचक-रसप्रद वर्णन थयुं छे. आ वर्णन कर्ताने निःशंक सुसज्ज कविनो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दरज्जो बक्षे तेवुं थयुं छे. कविने शृंगार-रसनो लगार पण छोछ नथी.

पद्य ५७-५८मां कर्ता बहु महत्त्वनी वात नोंधे छे. दीवालीनी रात्रिना अंत्य प्रहर दरम्यान, पोताने सारस्वत मंत्रनो एक लाख संख्यानो जाप परिपूर्ण थयो ते क्षणे, पोते क्षणभर माटे तन्द्रामां खोवाई गया हता; अने ते ज क्षणे तेमने माता शारदानां साक्षात् दर्शन सांपड्यां. कवि-साधके आ साक्षात्कार केटली बधी सूक्ष्मेक्षिकाथी कर्यो हशे तेनो ख्याल तो ते पछीना ५९ थी १०६ पद्योमां तेमणे करेलां देवी-विग्रह-वर्णन उपरथी मळी शके छे. आ वर्णनमां पण स्तन-वर्णन करतां कविए शृंगाररस अने कल्पनाशक्तिनो भारी ठाठ बनाव्यो छे. परंतु प्रथम दृष्टिए स्थूल कक्षानुं लागतुं आ वर्णन, सूक्ष्म तंत्र-दृष्टि धरावता अभ्यासी माटे एवुं ज रहस्यवादी अने तात्त्विक होवुं जोईए, एवुं सतत लाग्या करे छे. तज्ज्ञो आ वर्णनना मर्म उघाडी आपे तेवी लालच अवश्य व्यक्त करुं. आ दृष्टिए पद्य ७८, ८७, ८९ ध्यानार्ह जणायां छे.

१०३-४-५-६मां क्रमशः देवीना हाथोमांनां पुस्तक, माला, कमंडलु अने वाहन एवा हंसनुं वर्णन छे. १०७मां तन्द्राधीन साधके करेल देवीना पूजननुं वर्णन छे. १०८ थी ११३मां देवीनुं साधक द्वारा साक्षात्कार-क्षणे थयेलुं स्तवन छे, जेमां देवीने ह्रींकारकल्प-रूपे (१०८) वर्णवीने ऐंकारने पण (११२) स्मरण करेल छे.

११४ थी ११७ वळी महत्त्वपूर्ण पद्यो छे. तेमां, साधकने देवीनो आदेश मळे छे के "ऊठ, तारुं मों खोल", अने साधके ते प्रमाणे करतां ज, पोताना वैडूर्यमय कमण्डलुमांथी तेना मोंमां अमृतनी धारा वहावी, अने तेनां बिंदु साधकनी जीभ पर लागतां ज पांच-छ वार बीजमंत्रनो उच्चार करावीने (के करीने ?) देवी अंतर्धान थई गयां-एवुं वर्णन छे.

पोतानी गूढ अने गोपनीय विरल अनुभूतिनुं आवुं विशद वर्णन करनार साधक कविने आपणे साधुवादना कया शब्द वडे नवाजीशुं ?

पद्य ११८मां साधकनी स्थूल चेतनानुं जागरण अने मातानां दर्शन पछीना वियोगनी खिन्नतानुं वर्णन छे. ११९ थी प्रातः काल-सूर्योदयनुं वर्णन शरु थाय छे, जेमां दहींनां वलोणां (१२३)नुं तथा कुकडानी बांग (१२४)नुं पण वर्णन छे. १२६मां श्रीवीरनिर्वाणपर्वरात्रिनो उल्लेख, कर्ता जैन साधु होवानुं सूचवी जाय छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१३० मां कविए नवोदित सूर्यनी साथे नूतन वर्षनी लोक-स्थितिने उत्प्रेक्षात्मक रीते सरखावीने सरस अर्थान्तरन्यास (लोकोक्ति) प्रस्तुत कर्यो छे : यातानुयाते कुशलो हि लोकः – अर्थात् लोको तो अनुकरण करवामां निष्णात ज होय ! तो १३१मां वळी, नूतन वर्षारंभे मोंमां तांबूल (पानबीडां )नाखीने वर्तता लोकोने नोंधीने कह्युं के आ दिवसे जो मों लाल-लालीवाळुं होय, तो एनुं आखुं वरस खुशहाल जाय ! कविनुं वास्तवदर्शन अद्भुत छे. पछीनां पद्योमां पण नूतनवर्षनी लोक-स्थिति ज निरूपाई छे.

१३९मां कवि, पोते उन्निद्र अने हृदयमां बीजमंत्र ज अनुभवी रह्या होवानी पोतानी ते दिवसनी स्थिति निरूपे छे. १४०मां पण, निद्रा बीजजापने कारणे रूसणे गई होवानुं विधान काव्यमय रीते थयुं छे. १४५ थी १४९मां मंत्रनुं रहस्यमळ्युं वर्णन थयुं छे.

१५१-५२मां सारस्वत जाप, तेना प्रभावे थयेल स्वप्न-साक्षात्कार, अने तेना प्रतापे ज पोते आ काव्य रची शक्या होवानी केफियत आपणने संभळाय छे. १५२मां पोताना गुरु 'नन्दिरत्न'नो नामनिर्देश कर्ताए कर्यो छे.

काव्यमां प्रयुक्त केटलाक तळपदा लागता शब्दो पण नोंधपात्र छे : लम्बा (लांबी) (१४); सरयः (सर-सरवाणी ?)(१४); कर्रढिकुला (१५) (हाथना ठोंसा ?); टंकावली (चांदलां ?)(४१); मेराज्यक (मेरायां) (४५) इत्यादि.

कविओ अने साधको-बन्नेने रस पडे तेवुं आ काव्य यथामति शोधीने अत्रे पेश करतां आनंद थाय छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ सारस्वतोल्लास-काव्यम् ॥

श्रीभारत्यै नमः ॥

कश्चिज्जनो लज्जितहृज्जडिम्ना
शुश्रूषितश्रीगुरुपारिजातः ।
**सारस्वतं** सारमवाप्य **मन्त्रं**
नक्तंदिवाऽजायत जञ्जपूकः ॥१॥

**पद्मासनं** पूरयति स्म जापं
कुर्वन्नपापं यदसौ **सशौचः** ।
मेनेऽखिलैरस्खलितप्रसर्प-
ज्जाड्यारिबन्धाय स नागपाशः ॥२॥

गोक्षीरधाराधवलं वसानः
स(सु)कोमलं वस्त्रयुगं बभासे ।
जापादुपागत्वरशारदायाः
पुरस्सराङ्गप्रभयेव लिप्तः ॥३॥

तस्याऽतिलोलावपि लोचनाली
नालीकतुल्यं कविमातृवक्त्रम् ।
उद्दामसौन्दर्यमरन्दलोभा-
ज्जाने जहीतः स्म न जातु जापे ॥४॥

भाति स्म तस्य **स्फटिकाक्षमाला**
माला नु कल्पद्रुमकुड्मलानाम् ।
त्रपामि साक्षाद्यदि जातु देवीं
तत्पूजयामीति करे गृहीता ॥५॥

तेनाऽङ्गुली पत्रलपाणिरक्ता-
ऽशोकेऽक्षसूत्रस्य मिषेण बद्धा ।
**श्रीशारदातुष्टिवशागमिष्य-**
द्विद्याङ्गनान्दोलनकेलिदोला ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाग्वादिनी सन्निधिवर्त्तितत्त-
द्विद्याव्रजादेकतरं दिधीर्षुः ।
मन्येऽक्षमालाकमनीयपाणिः
पार्शं गताशङ्कमुपाददे सः ॥७॥

गम्भीरनाभीनिभकूपकूले
तस्य व्यलोकि स्रवदुस्रवारिः ।
अङ्गुष्ठपुष्टाङ्गवृषादवाप्त-
भ्रान्तिर्घटीयन्त्र इवाऽक्षसूत्रम् ॥८॥

मेरुं त्रिरत्नोज्ज्वलमेखलं ना-
ऽस्खलज्जपन्नप्युदलङ्घताऽसौ ।
विद्याधरेशा अपि यं न शक्ताः
स्युर्लंघितुं किं तमनाप्तविद्यः ॥९॥

हृत्पद्मतोऽतिप्रणिधानमुद्रा-
बन्धेन निर्यातुमपारयन्त्या ।
तस्य प्रसर्पज्जपहुङ्कृतीनां
दम्भादरावि श्रुतदेव्यलिन्या ॥१०॥

प्राप्तोऽथ **सारस्वतमन्त्र**जापा-
रम्भाद्दिनः पञ्चदशोऽपशोकः ।
प्रामूमुदन् तत्र मनांसि नृणां
**दीपालिका**वर्षतटाकपालिः ॥११॥

सम्पूर्णचूर्णद्रवसान्द्ररेखा -
प्रसाधिता यत्र विभान्ति सौधाः ।
गोक्षीरधारोज्ज्वललो[ल]लक्ष्मी-
लीलाकटाक्षावलिशालिनः किम् ॥१२॥

आशङ्क्यते यत्र विलोक्य लोकै-
र्लिप्ताऽऽलयप्राङ्गणचूर्णरेखाः ।
अर्केण कोपात्करकर्त्तरीभिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृताच्युतेयं किमु कौमुदीति ॥१३॥
धन्यात्मनां ध(धा)मसु चूर्णरेखाः
शुभ्रा न बाभ्राजति यत्र लम्बाः ।
सोत्कण्ठसत्कर्मजपुण्यसक्ताः
प्रत्यक्षलक्ष्याः सरयो वहन्ति ॥१४॥
पद्मावतां सद्मसु यत्र जाताः
खण्डाज्यवल्लड्डुकचण्डगोलाः ।
बाढं कुलस्त्रीकरढिंकुलातः
प्रातः पतन्तः क्षुदरिं क्षिपन्ति ॥१५॥
सन्त्येव गौराः करलालनीयाः
स्थूला अशैथिल्यकथास्तथापि ।
यल्लड्डुकेभ्यः सुदृशां कुतश्चि-
द्धीनाः कुचाः कालमुखास्ततः किम् ॥१६॥
स्याद्यत्रजानां सुकुमारिकाणां
स्निग्धात्मनामद्भुतमाधुरीणाम् ।
तुल्यः परं वाडवतप्तसर्पिः -
सिन्धोः सुधांशोस्तलितः सबिम्बः ॥१७॥
सूक्ष्मोज्ज्वलस्वादुससौकुमार्याः
केषां न हर्षाय यदीयसेवाः ।
किं सोमभासोऽन्यमहो सहिष्णु-
द्योः रत्नरुत्कर्त्तरिकाविलूनाः (?) ॥१८॥
दधिस्थिरस्थूलदलास्तनीयः
सेवा समन्तो हु(?ह्र?)त तन्तुपूगाः ।
सारस्ययुग्मोदकपुष्पगुच्छाः
श्रीवल्लयो यत्र जयन्ति शुक्लाः ॥१९॥
यत्रेश्वराणां तपनीयपाशाः
प्रेङ्खन्ति वर्णोत्तमखेलनीषु ।
किञ्जल्कपिङ्गानि किमप्रफुल्ल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसूनबुद्ध्या मिथुनान्यलीनाम् ॥२०॥

द्यूतेन दन्ता अपि भूपतीनां-
ये पातितास्तैश्चिरसङ्गृहीतैः ।
कपर्दिकानां कपटेन यस्यां
कुन्दावदातैः कितवा रमन्ते ॥२१॥

वाल्लभ्यतो हिङ्गुल-यूषयन्त्र-
न्यासच्छलाद्यत्र न मन्त्रविक्तः(क्तः ?) ।
कुर्यात् कुहूकुंभकुचाकपोल-
श्रीकारिणीः कुङ्कुमपत्रभङ्गीः ॥२२॥

तस्याऽभवद्वासरवासवस्या-
ऽवसानसन्ध्यावसरः सुमेध्यः ।
ध्यानादमुं क्षोभयितुं नु रागै-
रुत्पादितव्यापकदावशङ्कः ॥२३॥

तत्राऽरुणीभूतसमस्तभावे
हारोऽपि गुञ्जाफलगुम्फकल्पः ।
कालीं मुखालीमविलोक्य काल-
क्षेपादुपालक्षि चलेक्षणाभिः ॥२४॥

व्योम व्यरोचिष्ट विचित्रचञ्च-
द्दीधित्यदभ्रस्फुरदभ्रसालम् ।
**वाग्देवताविर्भवनोत्सवाय**
प्रत्यग्रपट्टांशुकमण्डपः किम् ? ॥२५॥

दीपादिषु स्वं क्षिपताऽऽतपस्वं
पलायितुं वेद्मि दिनेन मुक्तः ।
राज्ञो दलं वीक्षितुमायदाभा-
दस्ताचले शैखरिकः खरांशुः ॥२६॥

विष्णुं जगुः पर्वतमस्तकेऽज्ञा-
स्तेनाऽस्तभूमीभृतिभानुदम्भात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दैत्यादृतध्वान्तचमूदयेऽचि-
श्चक्रारुणं चक्रमभूत्तदीयम् ॥२७॥

रेजेऽर्कबिम्बि(म्बं ?) वरुणेभकुम्भः
सिन्दूरपूरच्छुरणारुणः किम् ? ।
किं तद्वधूकुङ्कुमितास्यपद्म-
च्छायारुणः स्फाटिकदर्प्पणो वा ॥२८॥

श्रीकण्ठकान्तामगमं न गङ्गा-
मित्यात्मशुद्ध्यै पुरतः सुराणाम् ।
उत्तुङ्गकल्लोलकरेऽर्कगोलं
दध्रे क्रमादम्बुधिरग्निवर्णम् ॥२९॥

पत्युः प्रतीच्यास्तुरगेभगर्भं-
रत्नैर्भृतं मन्दिरमम्बुराशिः ।
तस्योपरिष्टादहिमांशुबिम्बं (?)
शिश्राय शोणोपलकुम्भशोभाम् ॥३०॥

अम्भोल्पमग्नार्कमिषेण लक्ष्म्याः
प्रमीलितायाः प्रियसिन्धुतल्पे ।
तुङ्गः स्तनः पीडनपाटलः किं
जातोऽनिलोद्धूतदुकूलदृश्यः ॥३१॥

मन्ये तमोभिः कृतरथ्यरङ्ग-
त्तुरङ्गरूपै रविरात्मवैरी ।
नीत्वोपकण्ठं धिगपाति पापैः
पाथोधिमध्ये तदनु प्रसस्ने ॥३२॥

कालीं तमःकञ्चुलिकां सतारा-
मुक्तामदृश्येन्दु-तरण्युरोजाम् ।
सन्ध्यानुरागोरगवल्लिरङ्गा-
च्चङ्गा मुखे(ऽ?) वस्त कुहूकुलस्त्रीः॥३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वप्रकाशप्रवणार्कदीपो-
त्सर्प्पच्छविच्छद्मशिखान्तसूतैः ।
नभःशरावक्षरितैरभारि
क्षोणीतमः कज्जलचूर्णपुञ्जैः ॥३४॥

ध्वान्तावलिश्यामलितां विचित्रा-
काराञ्चितोडुप्रकराभिरामाम् ।
दीपोत्सवे रात्रिवधूरपि द्यां
चक्रे विलिप्योज्ज्वलमण्डनां नुः ॥३५॥

कोपेन जज्वाल तरङ्गिरागा
नूनं वनस्था ततिरौषधीनाम् ।
प्राणेश्वरः शीतकरोऽकरोद्य-
न्ना(न्न)मां करस्पर्शनतोऽपि तोषं ॥३६॥

स्मेरं मरन्दाभृतमिन्दिरायाः
सद्माल्परोलम्बकलङ्कपङ्कम् ।
अन्तः सरस्तारकपत्यपत्य-
व्रातोपमां कौमुदमाप वृन्दम् ॥३७॥

उच्चैस्तरादम्बरतोऽस्तशैले
पातेन तेजो यदभाजि भानोः ।
दीपालयस्तच्छकलायमानाः
प्रत्यालयं दिद्युतिरे तदानीम् ॥३८॥

लोकेन हेमन्तसमन्तशीता-
वपीतसीतङ्कतया हुताशः ।
दा(दी)पावलीदीपकदम्बदम्भा-
दूपे तमःसन्ततिकृष्णभूमौ ॥३९॥

मा संविगृह्येन्दुरहोदुरन्तै-
स्तत्राऽह्नि जिग्ये तिमिरैस्ततोऽसौ ।
नष्टे गृहीतोडुदलोऽथ दीप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याजादभूच्चम्पकपुष्पवृष्टिः ॥४०॥

नारीर्निरीक्ष्याभरणाद्भुताङ्गीः
शृङ्गज्वलद्दीपकपङ्क्तिभङ्ग्या ।
टङ्कावलीस्तत्र महे महेभ्य-
गेहश्रियोऽप्याऽऽमुमुचुः स्वभाले ॥४१॥

दीपोत्सवे नूनमगादलक्ष्मी-
र्लक्ष्मीश्च वेश्मस्वकृतप्रवेशम्
तस्मादलभ्यन्त मिथोऽबलाभि-
र्दीपच्छलात्काञ्चनकन्दलानि ॥४२॥

अग्रे निजस्वामिजहासहर्षा-
दावासलक्ष्मीरिति वीक्ष्यते स्म ।
तद्द्वारवक्त्रे गृहरत्नराजी
ताम्बूलरङ्गारुणदन्तपङ्क्तिः ॥४३॥

ध्वान्तद्विषा च्छिन्नरुचोऽरयो न-
श्चण्डांशवोऽमी इति शङ्कया किम् ।
रोषारुणास्तेष्वधिरुह्य तारा-
स्तस्थुः पृथुस्थालगदीपदम्भात् ॥४४॥

स्वस्वालयेभ्यो निरयुः कुमारा
**मेराज्यकै** राजितपाणिपद्माः ।
कर्तुं नु चामीकरकेतकैस्त-
ज्जापाय दर्भासनजा सपर्याम् (?) ॥४५॥

निर्माप्य मे रात्रिकदीपिकाः स
श्रीपर्वराट् पुम्भिरलभ्यमानम् ।
अशूशुधद्वेश्मसु शोकशत्रुं
शङ्के सपत्राकरणाय रात्रौ ॥४६॥

आह्लादलक्ष्मीं बहुलामवाप्य
केऽप्यग(ग्र)धामान्तर तिह्ममांतीम् (?)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धीरा निधीकर्तुमिवौषधीच्छा-
धीना: खनन्ति स्म वनावनीषु ॥४७॥

दीपावलीपावनरात्रिकार्यं
निर्माय मंगल्यमथो नृनार्यः ।
दीपद्युतादर्पकदोःप्रतापाद्(?)
दान्तोदरं तल्पनिकेतमापुः ॥४८॥

दीपस्तदीयामलदीप्तिदीव्य-
च्चीरावृताङ्ग्यास्तिलकं किलैकम् ।
देहल्यनुल्लङ्घनलालसायाः
सत्याः श्रियोः दर्शि(श्रियोऽदर्शि) गृहोदरेऽपि ॥४९॥

सद्वर्णपादं गुणगुम्फयोग्यं
सज्जं कलावज्जनितं युवानः ।
भेक्षुस्तथा तल्पममा वधूभिः (?)
काव्यं यथाऽलंकृतिभिः सहार्थाः ॥५०॥

गाढोपगूढस्तनपीडनादि-
क्रीडाः प्रदीपोऽत्र वधू-धवानाम् ।
पश्यन्मरुल्लोलशिखोऽन्तरन्तः
शङ्के शिरोऽन्दोलयति स्म रागी ॥५१॥

पुष्पायुधायुःपरिवर्द्धकं य-
द्यद्यौवनद्रोः कुसुमायमानम् ।
यद्रागवार्द्धेरमृतोपमं तत्
किं नो युवानो विदधुर्वधूषु ॥५२॥

क्रमेण जाता यदि घूर्णनिभ्यो
निर्णीतनिद्रागतयः प्रदीपाः ।
किं तर्हि वाच्यं रतकेलिखिन्नो-
ऽन्तरङ्गतारुण्यवधूवराणाम् ॥५३॥

संभोगयुद्धेऽङ्गुलिकुन्तकोटि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्रूचाप-दृक्‌तोमरघोरघातैः ।
प्रासा निरैक्षुः किमु सान्द्रनिद्रा-
दम्भादनुत्थां मिथुनानि मूर्च्छाम् ॥५४॥

जालाध्वना चक्षुरगोचराङ्गः
प्रविश्य सौधेषु समीरचौरः ।
जरीहरीति स्म शयालुदम्प-
त्यङ्गश्रमाम्भःकणमौक्तिकानि ॥५५॥

उत्थाय रात्रौ बहुधान्यशुद्धि-
सिद्ध्योः श्रयन्तादपि(?)हेतुभावम् ।
स्वस्वौकसः सूर्यकदारुहस्तौ
नार्योऽचकर्षन्नहितागुणज्ञाः ॥५६॥

तस्यां निशायामथ बालिशानां
धुर्यः स तुर्यप्रहरान्त्यभागे ।
**सञ्जातसारस्वतलक्षजापः**
प्राप क्षणं स्वापमिवाऽपपापः ॥५७॥

उद्धर्वन्दमां तावदभङ्गभाग्यः
सौभाग्यशोभालटभाङ्गभङ्गी ।
**श्रीशारदां** कोविदकल्पवल्ली-
**मग्रे समग्रे हितदां** ददर्श ॥५८॥

नाऽबोधि कामाधिकदां स्वपुत्री-
मादावतोऽपत्यमहत्त्वमिच्छुः ।
यत्पादयोः पूजयदिष्टपूर्त्यै-
वेधा न्यधान्नाकिमणीन्नखान्नु ॥५९॥

यत्पादयोरुल्लसदंशुदीप्रां
कामाङ्कुशाः किं सुरकेलिवाप्यः ।
नित्याऽनमद्बिम्बनदम्भमज्जा-
देव्यङ्गरागाविलरक्तनीराः ॥६०॥

नाऽमी नखा यत्पदयोः सुवृत्ताः
किं तर्हि सा **मन्त्रठकारमाला** ।
तां लोहितां चिन्तयतां सतां यद्-
वश्याः कवित्वादिकलामहेलाः ॥६१॥

यत्पन्नखाः प्रेङ्खिमयूखलेखा-
शिखामुखा मूर्खमतल्लिकानाम् ।
कुर्वन्ति दीपा इव हृत्रिकेता-
लोकं तमस्काण्डविखण्डनेन ॥६२॥

भवार्णवान्तः सततभ्रमो यत्
पादाङ्गुलीविद्रुमकन्दलानाम् ।
लाभेन भो यस्य भवत्यवन्ध्यः
सुधीवराणां धुरि वर्णनीयः ॥६३॥

पादौ यदीयौ जलदुर्गवृत्ते-
रुज्जाग्रतः षट्पदरक्षकस्य ।
पाथोरुहोऽप्याहरतः श्रियं चेत्-
तव्याति(तयाऽपि) यातव्यमवश्यमेव ॥६४॥

द्योभूरुहामीहितमात्रदानां
हीनोपमानात् कविदीयमानात् ।
यस्याः प्रकोपं किमधारयन्तौ
पादौ जपादौ स्पदशोणवर्णौ ॥६५॥

वाचालतामञ्चति नूपुरं चे-
दचेतनं यच्चरणे निविष्टम् ।
तद्युग्मधारी हृदि तर्हि विज्ञः
स्याद्वक्त्रनिर्यद्वरनव्यकाव्यः ॥६६॥

वर्णोऽस्ति शोणस्तरबादिवाच्य-
स्तेनाऽस्य विश्राम्यति तारतम्यम् ।
यस्याः पदाब्जद्वय एव यत्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विश्रान्तविश्वत्रयभक्तिरागम् ॥६७॥

ऊर्वाततताया यदनर्घ्यजङ्घा
वल्लेः सकाञ्चीमणिकौसुमायाः ।
मञ्जीरदम्भादकृत स्वयंभू-
र्भाम्भोभृतं मेरुभृदालवालम् ॥६८॥

रक्तारविन्दं कुरुविन्दमग्निः
सिंदूरमित्याद्यरुणार्थवृन्दे ।
मुख्यौ यदंह्री तदमू दधेते
मूर्ध्नि स्फुरन्नूपुरहेमपट्टम् ॥६९॥

पादा यदीयाः कृतपूजनानां
जाड्यं जवान्नाशयितुं जनानाम् ।
मञ्जीरमाणिक्यमयूखलक्षाः
संतन्वते कोपकटाक्षलक्षाः ॥७०॥

ऊरुश्रियाऽऽखण्डलकुम्भिशुण्डा-
दण्डाभिमानोद्दलनेऽद्भुतं नः ।
यस्याः सदा नम्रशिरस्करम्भा-
स्तम्भाभिभूतौ पुनरस्ति खेदः ॥७१॥

युक्त्या भुजायामवती यदीय-
श्रोणीतटे काऽप्यमरी न काञ्चीम् ।
शक्नोति बन्द्धुं न भवत्यमुष्या
दिव्या यदि व्याससमासशक्तिः ॥७२॥

सम्भाव्यते स्यूतमदे भुवां चे-
त्तदर्कतूलातुलतन्तुलक्षैः ।
चेद्देवलोके तदतन्द्रचन्द्र-
ज्योतिःकलापैः किल यद्दुकूलम् ॥७३॥

जैनेन्द्र वाग्या(क्पा)लनपात्रसंवि-
द्यानोत्तमाचार्यपरीष्टितुष्टैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुण्यैः परीतां नु तनूलतां या
धत्तेऽवदातद्युतिदेवदूष्याम् ॥७४॥

आश्रोणि यस्यास्तनुरस्ति पुण्य-
क्षेत्रं नु गौरोद्गतरुग्(क्)प्ररोहम् ।
यत्रान्तरीयाग्रतरङ्गभङ्ग्या
भान्त्यद्भुताः सीरविलेखलेखाः ॥७५॥

यस्याः पुरे गर्भगनाभिकूपो
यो मेखलामध्यमदीप्रवप्रः ।
रत्नोत्थितास्तत्र मिथो मिलन्त्यः
कुर्वन्त्यलम्भाः कपिशीर्षशोभाम् ॥७६॥

काले कलौ गत्वरतत्त्वविद्ये
या मेखला हाटकपट्टिकायाम् ।
रत्नानि धत्तेऽक्षरपङ्क्तिरूपां-
नीवीमवैम्युत्तमवाङ्मयानाम् ॥७७॥

मध्यो न किं वा न मयैक्षि यस्याः
प्राच्यो न तस्य प्रतिमासुवृष्टेः ।
अन्यस्तु पक्षोऽभिमतो यतोऽहं
स्थूलार्थदर्शी स च गाढसूक्ष्मः ॥७८॥

जानीत यन्मूलतनूलताम-
प्युन्मीलितां तूलिकया कलातः ।
नो चेत् कथं मध्यशलाकिकायां
तिष्ठत्यपारः स्तनशैलभारः ॥७९॥

सर्वेश्वरी या वरमीश्वरादेः
पादेन कस्याऽपि ततिं करोति ।
नो चेद्वपुर्वालनयावलग्नो
भग्नोऽभविष्यद्विसखण्डबन्धुः ॥८०॥

यस्याः प्रभावेन विनाशवन्ध्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्ध्यातिमेध्या मुखपूर्णिमेन्दोः ।
जाघट्टि शोणोपलकुट्टिमं वा
वक्षोङ्गणे कञ्चुकचक्रवर्त्ती ॥८१॥

आकल्पकीर्तिं कलितप्रतापां
वक्षोवनीमुल्लसितप्रवालाम् ।
चर्कर्त्ति चोलः कुचशैलभूमीं
यस्याः समीरोद्धुतधातुधूलीम् ॥८२॥

वैराग्यभङ्ग्या हृदयाद् यदीयाद्
यः पुस्तकान्तर्गतकान्तसूक्तैः ।
कृष्टो बहिस्तिष्ठति रागराशिः
शङ्के स लोकेऽजनि कञ्चुकाख्यः ॥८३॥

काश्मीरदेशस्य ददात्यदोऽत्यु-
त्कर्षं ततः प्रीतिवशात्तदीशा ।
केदारमेकं हृदि कुङ्कुमस्या-
ऽऽदत्ते स्म या वै मितकञ्चुकं नु ॥८४॥

काठिन्यमुद्धृत्य हृदो बहिर्या
वर्यावकार्षी[त्] कुचरूपकूटौ ।
तेनाऽजिजीवज्जनतां यदल्पा-
दप्याश्रितानां करुणां विधाता ॥८५॥

लावण्यपुण्याम्बुघटौ मनोभू-
मत्तेभकुम्भौ रतिकेलिगोलौ ।
मुक्तालतापक्वफले तदुत्थ-
ज्योतिर्जले पाटलपद्मकोशौ ॥८६॥

तेजस्विवाग्बीजमणी समुद्रौ
हृद्धामसद्धर्मविवेकमौली ।
ज्ञानामरद्रुस्तबकाविति स्या-
द्यस्याः कुचद्वय्युपमानिघण्टुः ॥८७॥ युग्मम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लिष्यन्नुरोहिङ्गुलरङ्गचोलं
यस्याः स्तनास्फालजकोपशंसी ।
शुक्लोऽपि लौहित्यमुपैति हारो
वीक्ष्याऽपि को वा सुकुचां न रागी ॥८८॥

कम्बुः किमु स्याद्यदकुण्ठकण्ठ-
स्पर्द्धाय पूर्णोऽप्ययमुज्ज्वलात्मा ।
यद्युच्चरत्योमिति वाद्यमानः
पापापहं नो परमेष्ठिबीजम् ॥८९॥

देदीव्य(प्य)ते देव्यधरारुणास्या-
सिन्दूरपादा कुमुदावदाता ।
या मानसे सौमनसे न सेवा-
लस्याऽऽलये दिव्यसितच्छदीव ॥९०॥

वार्द्धिं विना विद्रुममुद्धभूवा-
ऽशोकं विनाऽस्योदलसत् प्रवालम् ।
बिम्बीं विना बिम्बमलालगी(लीलग ?)द्वा
किं धूतबन्धूकमदो यदोष्ठः ॥९१॥

पद्मेन्दनाद्यद्वदनं समास-
भ्रूश्रीकरीं ध(धा)रयते पुरापि ।
राज्ञो जयाल्लोहितशुण्डदर्ड (दण्ड-)
भालातपत्रं त्वधुना तदूर्द्धवम् ॥९२॥

आच्छिद्य पुष्पेषुभयाद्दयालुः
शङ्के स्वनासामिषतो निषङ्गम् ।
या न्यग्मुखीकृत्य करोति रिक्तं
न्यध्याय्यधस्तद्द्विजपुष्पपङ्क्तिः ॥९३॥

स्वत्यागधत्तूरकृतार्चशम्भोः
खेदाय तद्बन्ध्यपदामुपास्ते ।
सूक्ष्मान्तपक्ष्माङ्कुरकण्टकोद्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्तारालियुग्दृग्दलकेतकीयाम् ॥९४॥

दोलाविलासोचितकर्णफाली
व्यालीढताडङ्कनिभेन बद्ध्वा ।
या मुख्यरूपे वहते स्वतेजः
कीर्तिद्विषद्द्योमणि-पूर्णिमेन्द्वोः ॥९५॥

यद्दोर्मयद्योतरवः सपर्या-
पर्याकुला विज्ञकुलार्पितेष्टाः ।
शोणाङ्गुलीपल्लवलब्धशोभाः(भा-)
संभारमाबिभ्रति भूषणानाम् ॥९६॥

कोटीरहाराङ्गदकङ्कणाद्य-
प्रमाणमाणिक्यवर्ती विलोक्य ।
जानामि यां रत्नकरेण रत्ना-
करेण वाऽऽरोहितसर्वकोशाम् ॥९७॥

प्रालेयमूर्त्तेस्तरलार्कबालो-
न्मीलन्मरीचिप्रचयेन यस्याः ।
उत्तीर्णवासोग्रतरङ्गधारं
जागल्यतेऽङ्गं तनुते न जाने ॥९८॥

आदावभूतां जनकानुरूपे
श्रीर्या च दुग्धाब्धिविधिप्रसूते ।
आचिच्छिदाते नु मिथोऽनुपात-
श्वेतौ गुणौ क्वाऽपि कलिप्रवृत्तौ ॥९९॥

या वक्त्रपङ्केरुहपातुकानां
मालामिव स्तम्भितषट्पदानाम् ।
वीणां कलक्वाणवितीर्णकर्ण-
प्रीतिं करे मारकतीं बिभर्त्ति ॥१००॥

य(या ?) दानगत्याद्यखिलप्रकारैः
किं नो करेणोः कर्णि करोति ? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पार्थक्यमेकाक्षरतः करस्था
चेद्वल्लकी नाऽञ्चति सल्लकीतः ॥१०१॥

द्विः सप्तविद्योपनिषन्मणीनां
या पुस्तिकायाः कपटेन पेटाम् ।
न्यस्तस्वदृग्(क्) चित्रकवल्लिमारा-
ल्लाति स्म पादानतदीनहेतोः ॥१०२॥

या पुस्तकं वाचयतां जनो यद्-
भक्तस्तु यद्वाचयिता कुतोऽस्तु ? ।
येनाऽस्य यादस्पतिसर्वविद्या-
स्तद्वः पुनः कोऽप्यपरो न यस्याः ॥१०३॥

कण्ठेसु मुञ्चंश्चिबुकाग्रचुम्बि-
स्थूलस्तनस्पर्शजकोपभीरुः ।
यस्याः करे कश्चिदमुञ्चदक्ष-
स्रग्माल्यमर्चार्थमुरः पुरःस्थे ॥१०४॥

पाणिस्थवैडूर्यकमण्डलुर्या-
सौवास्यदास्यप्रणयीन्दुपुर्याः ।
उच्चाटहेतुं कटके तुलौजाः
किं राहुमानीय वहत्युपान्ते ॥१०५॥

नव्यप्रसूता सुरसौरभेयी
या भेक्षुषां दोग्धि मनीषितानि ।
तेनान्तिकं वत्सकवत् स कश्चि-
द्यस्या न मुञ्चत्युचितं मरालः ॥१०६॥

तां मानसोत्थैरथ रूपभङ्गी-
चङ्गीकृताङ्गीमिह गीरधीशाम् ।
व्याकोशकाव्याम्बुरुहैः सुवर्ण-
श्रीवर्णनीयैर्महितुं स लग्नः ॥१०७॥

ॐकारकल्पां सकलामराणा-

मग्रेरस(सर)त्वेन सरस्वति ! त्वाम्
जाड्येन चण्डेन विडम्बितः त्वाम्
गोस्वामिनीं विज्ञपयाभ्य(म्य)निरः ॥१०८॥

जाड्यन पीड्ये जनयित्रि ! चित्रं
वेविद्यमानावरणव्रजोऽहम् !
तेनेदमुच्छिन्द्धि निजांह्रिनिष्ठा-
ङ्गुष्ठोल्बणाग्निष्टनिषेवणान्मे ॥१०९॥

स्वभावस्वत्त्व(सत्तत्त्व?) वती सती मे
दभ्रं हृदभ्रं श्रितवत्यपि त्वम् ।
हत्वा तमः प्रातिभसुप्रभातं
नातन्तनीषीदमयौक्तिकं ते ॥११०॥

भाग्योदये कामगवी पुरोगा
संपादयन्ती हितमाश्रितानाम् ।
तस्मादभाग्येऽपि मदिष्टमेकं
तेभ्योऽधिकायास्तव दातुमर्हम् ॥१११॥

प्रेङ्खोलनामौलिगचामरालो-
दण्डाः किरीटाग्रनिविष्टरत्नाः ।
जाड्यं हरन्ते तव कर्मकर्यो
ऽप्यैङ्कारवर्योपमया स्मृताङ्ग्यः ॥११२॥

तेनैतदल्पार्थकृतेऽर्थना ते-
नाऽर्हा फलायेव मरुल्लतायाः ।
मातर्ममाऽतः करुणाकटाक्षं
मुञ्चोपरिष्टाद् घटितेष्टलक्षम् ॥११३॥

स्तवनम् ॥

**विज्ञप्तिमेवं कृतवन्तमाख्य-**
**त्तं मूर्खमुख्यं विधुजिन्मुखी सा ।**
**उत्तिष्ठ पात्रीकुरु वक्त्रमित्थं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चक्रे च वक्रेतरकर्मकोऽसौ** ॥११४॥

**देवी तदा तस्य दिनोदयाब्ज-**
**स्पर्द्धाकरस्तोकविकासिवक्त्रे ।**
**दत्ते स्म वैडूर्यकमण्डलूद्य-**
**न्नीलाब्जनालीममृतस्य धाराम्** ॥११५॥

याऽनर्गले निर्गमितेऽद्य मान्द्ये
वागीशया गौरदृगौषधेन
रेजेऽस्य किं पथ्यपरायणायाः
शास्त्रेषु बुद्धेः स्फुरणाय यष्टिः ॥११६॥

तस्यां च किञ्चित्कृपणाज्यधारा-
न्यायेन जिह्वोपरि लग्नवत्याम् ।
**सा पञ्चषोच्चारितबीजवर्णा**
विद्युद्वदान्य(न्या)व्यवधत्त देवी ॥११७॥

यस्याः प्रसादेन मुखादवापे
स्वप्नोऽयमीदृग्घनपुण्यलभ्यः ।
साऽपि प्रमीलाऽस्य जगाम दूरे
धिग् वेधसोऽभीष्टवियोगदत्वम् ॥११८॥

तावद्वियत्तालतरौ विशाले
पिङ्गाङ्गभाः पश्चिमभागरागः ।
प्राचीकटद्वासरमर्कटेशः
प्राचीशिखायां शिखिशोणमास्यम् ॥११९॥

पूर्वायुवत्या निदधेऽस्य जापा-
वसानमङ्गल्यकृते स्वमौलौ ।
बालार्करुग्घट्टपटीपटीयः-
पाटल्यनिर्धादि(टि?)तधातुरागा ॥१२०॥

म्लानोडुपुष्पाद्विपुलाभ्रतल्पा-
दुत्थाय यान्त्यां रजनिप्रियायाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्रष्टांशुकः श्राग् विललाग भूयो
रागाविलः शीतकरोऽम्बरान्ते ॥१२१॥

जहार हारावलिहेतवेऽहः -
श्रीस्तारमुक्तौधमभूत्तदा किम् ? ।
भूयस्तरां स्तात्पुनराप्स्यतीयं-
श्यामा समुद्रप्रियपुत्रपत्नी ॥१२२॥

पाथोधरध्वानमपार्थयन्तो
ये स्म प्रथन्ते दधिमन्थनादाः ।
मन्येऽपविघ्नाग्र(ग्रि)मवत्सरासि-
प्रौढोत्सवे ते पटहप्रणादाः ॥२३॥

उद्योगिनां जागरणाय साधा
रण्येन दीर्घाः कृकवाकुघोषाः ।
पुण्यार्थमद्रव्यविभातभेरी-
भाङ्कारशोभां बिभराम्बभूवुः ॥१२४॥

शोणौ धुनीधन्यवधूर्मिपाणि-
प्रेङ्खोलिनौ प्रेमगुणेन बद्धौ ।
भूयो भवद्योग-वियोगवर्या-
वासञ्जतां कोकविलासगौलौ (?) ॥१२५॥

वर्द्धापयन्ति स्म सुपर्ववध्वः
**श्रीवीरनिर्वाणदपर्वरात्रिम् ।**
पेतुः समन्तादिति शाड्वलेषु
प्रालेयलेशव्यपदेशमुक्ताः ॥१२६॥

दुग्धाज्ययोर्धामनि चेदियन्तः
स्युर्मोदकाः पर्व तदेति मन्ये ।
स्मराब्जहस्ताभिनयालिगुञ्जा -
गीर्भिर्न कस्को जहसेऽब्जिनीभिः ॥१२७॥

दीपालिकापोषितपूर्जनाना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मर्को मनोभिः किमु पारणोत्कैः ।
आकृष्य- - त्तमरोषरक्तो-(?)
ऽध्यारोह्यत प्रागचलाग्रभागम् ॥१२८॥

कोवेदभानाउ(मु?)दिते विभाना-(?)
मीशे तमः स्थास्यति दृश्यमुर्व्याम् ।
छायामयस्तु प्रतिवस्तुपुञ्ज-
स्तस्य स्थितः पश्यत दुर्जयस्य ॥१२९॥

जातेऽथ तेजोऽरुणिते प्रभाते
नाऽतेनिरे के सविशेषवेषम् ।
दृष्ट्वेव नव्यांशुकमर्कमादौ
यातानुयाते कुशलो हि लोकः ॥१३०॥

ताम्बूलरक्ताधरदन्तजिह्वाः
सर्वेऽभवंस्तच्छुभमेव तेषाम् ।
ये तद्दिने सन्मुखरागयुक्ता-
स्तेऽशेषवर्षेऽपि विषादमुक्ताः ॥१३१॥

ताम्बूलबाहुल्यविलोहितास्याः
शुभ्रांशुकेन्दुद्युतिदत्तदास्याः ।
सन्तो विलेमुः(सुः) किमिलावतीर्णाः
सौदामिनीसुन्दरशारदाब्दाः ॥१३२॥

भाग्यश्रियाऽऽलस्यगमायपुंसां-
भाले समुक्ताफलरक्तचोला ।
लाजाढ्यकालेयजपुण्ड्रदम्भा-
द्दोर्वल्लिरुच्चै रचयाम्बभूवे ॥१३३॥

नासाग्रलग्ना क्षतपूर्णपुण्ड्र-
व्याजादुर्धरक्तोज्ज्वलबिन्दुबाणम् ।
भ्रूयामलज्यालिकचापदण्डे
जेतुं कलि(लिं) सन्दधिरे कुलीनाः॥१३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परेण प्रणयप्रवीणाः
सन्तः प्रणामप्रवणोत्तमाङ्गाः ।
किं भालभूसम्भृतभाग्यभारा
भुग्नीभवत्कन्धरतामधार्षुः ॥१३५॥

सर्वादरः सुन्दरकूरसङ्गः
संवत्सरस्याऽऽदिमवासरश्च ।
धान्येषु धनेष्वपि(धनेषु धान्येष्वपि?) राजमाषै-
रेवाऽऽप्यते स्म त्रिकयोग एषः ॥१३६॥

रक्तः प्रतापाद्भुतकूरकीर्त्तिः
स्थालासनः श(स)स्यकुलस्य राजा ।
भुक्तिक्षणेऽन्दोलितपाणिपद्मो-
द्यच्चामरोऽराजत राजमाषः ॥१३७॥

ढक्कादिगाढध्वनितैरकर्ण-
व्यापारिणः केन कृता वदान्याः ।
नो चेदनाकर्णितचाटुवाच-
श्छिन्दन्ति दौस्थ्यं कथमर्थिपुंसाम् ॥१३८॥

**ध्यातुः पुनस्तत्र दिनेऽस्य निद्रा-**
**मुद्राविमुक्ताक्षिसरोरुहत्वम् ।**
**आसेदुषः स्वान्तसरस्वतिस्थे**
**स्वप्नाम्बुजे बीजमतिष्ठदेकम्** ॥१३९॥

जानेऽस्य बीजान्यपराणि जापे
दत्तापमाना वनितेव निद्रा ।
कोपादुपादाय चला पलाया-
ञ्चक्रे नरं कस्य मणिः स्थिरो वा ॥१४०॥

चेत्तानि चित्तान्निरयुस्तदा किं
जातं यदेकं हि हृदालयस्थम् ।
दातेदमेवाऽस्य समग्रमुर्वी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दत्तप्रकाशो रविरग्रहोऽपि ॥१४१॥

यच्चोत्तमानां चितपञ्चवर्णं
विघ्नावलिव्यालविलोपितूर्णम् ।
कलाशिखाशालिशिरःशिखण्ड-
श्रीखण्डनं खेलति हृद्वनेषु ॥१४२॥

पापापनोदे पटुवाद्यमानः
सद्यो यदेवोच्चरतीति हेतोः ।
श्रीवासुदेवः सुतनिर्विशेषं
चुम्बत्यबाङ्गिप्रबलास्थिकम्बुम् ॥१४३॥

नाऽलीकसूनोर्लपनः प्रतोली-
रालोक्य रुद्धाः सकलान्यवर्णैः ।
पूतं परस्पर्शभयेन जाने
यन्निर्ययौ भिन्नकपोलभित्ति ॥१४४॥

तिस्रोऽपि रेखास्त्रिजगन्ति गौर-
ज्योतिःकलासिद्धिशिलाविशाला ।
सिद्धः सबिन्दुस्तदुपर्यतो य-
ल्लोकस्य किं रूपकमल्पमातम् ॥१४५॥

पञ्चार्हदादिप्रथमाक्षरोत्थं
जैनाः समग्रागमसारमाहुः ।
षड्बिन्दुखण्डेन्दु-विरिञ्चिनामो-
पन्नं यदन्येऽप्यधिकं त्रयीतः ॥१४६॥

योगिप्रधानप्रणिधानधारा-
गोदावरीखेलिवितीर्णलक्ष्मि ।
हालक्षमापालति यत्पुरस्थै -
र्वर्णद्विपञ्चा[श]दुदारवीरैः ॥१४७॥

यद्बीजमेकेन्दुकलां दधानां
जिह्वादलं यावदलंकरोति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्तावदास्याम्बुरुहस्य किञ्चि-
त्सङ्कोचिता साऽनुचिता न चिन्त्या ॥१४८॥

आमोक्षमेकोऽप्यरिहादिवर्णो-
रातीति विप्राणयितुं श्रितानाम् ।
तत्पञ्चकोत्थं यदवैमि पश्य-
त्युत्कन्धरं वस्त्वधिकं ततोऽपि ॥१४९॥

वाग्देवताया वदनारविंदा-
त्तद्बीजमासाद्यत यद्यनर्घ्यम् ।
तत्पारिजातोऽजनि मंजरीमा-
न्निस्सीमसौरभ्यमभूत् सुवर्णम् ॥१५०॥

आराद्धसिद्धान्तसुरीवरीयः-
प्रसादजस्वप्नमधोर्महिम्ना ।
सौघाऽजनि प्रागकरीरसंज्ञा-(?)
वीरुल्लगन्नद्य कवित्वपुष्पः ॥१५१॥

**श्रीनन्दिरत्नाख्यगुरुप्रसाद-**
प्रासादवासाप्तसुखः स चेदम् ।
**सारस्वतोल्लास** इति प्रतीतं
स्फीतं गुणैरातनुते स्म **काव्यम्** ॥१५२॥

सन्तु स्तनन्धयधियोऽध्ययनाय बद्ध-
मेतन्मुखाब्जमणिमण्डनतां नयन्तः ।
श्रीभारतीति थि(स्ति)मिताक्षरमन्त्रबीज-
प्रष्ठप्रसादमधिगम्य कविप्रकाण्डाः ॥१५३॥

इति सारस्वतोल्लासकाव्यम् ॥श्रीः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org